# मूर्खाः शुकाः

● (सं०) श्यामला

कस्मिंश्चित् वने कश्चन साधुः वसति स्म । सः स्वस्य कुटीरे कांश्चन शुकान् पालितवान् आसीत् । सः तेषां रक्षणार्थं तान् पाठितवन् आसीत् - ''यदा यः कोऽपि दृश्येत तदा भवद्भिः - 'व्याधः आगच्छति, जालं प्रसारयति, किन्तु वयं न गच्छेम' इति वक्तव्यम्'' इति । यः कोऽपि दृष्टः चेदपि ते शुकाः सर्वदा एतानि एव वाक्यानि वदन्ति स्म ।

एकदा साधुः भिक्षाटनार्थम् अन्यं ग्रामं गतवान् । तदा तेन मार्गेण गच्छन् कश्चन व्याधः वृक्षे उपविष्टान् तान् शुकान् दृष्टवान् । तस्य मनसि आशा उत्पन्ना - एते शुकाः ग्रहीतव्याः इति । सः यदा वृक्षस्य समीपम् आगतः तदा सर्वे शुकाः युगपत् गानम् आरब्धवन्तः - 'व्याधः आगच्छति, जालं प्रसारयति, किन्तु वयं न गच्छेम' इति । एतत् श्रुत्वा व्याधः आश्चर्यसमन्वितः जातः । सः कदापि एतादृशान् शुकान् न दृष्टवान् आसीत् ।

'एते शुकाः प्रशिक्षिताः । एतेषां ग्रहणं न सुकरम्' इति चिन्तयन् सः व्याधः तत्रैव वृक्षस्य अधः उपविष्टवान् । फल-प्राप्त्याशा अल्पा अपि नास्ति चेदपि झटिति प्रतिगन्तुम् अनिच्छन् सः तत्रैव जालं प्रसार्य बीजपूरफलस्य कांश्चन खण्डान् जालस्य उपरि संस्थाप्य - 'कोऽपि एकः वा मूर्खः शुकः फलस्य आशया जाले पतेत् चेदपि मम सौभाग्यमेव'' इति चिन्तयन् तत्रैव शयानः निद्रावशम् अगच्छत् ।



किञ्चित्समयानन्तरं व्याधस्य जागरणम् अभवत् । सर्वे शुकाः पूर्ववत् - 'व्याधः आगच्छति, जालं प्रसारयति, किन्तुं वयं जालदिशि न गच्छेम' इति गायन्तः आसन् । व्याधः नेत्रे उन्मील्य अपश्यत् । सर्वे शुकाः जाले एव पतित्वा गायन्तः आसन् । तेषां मूर्खतां दृष्ट्वा हसन् व्याधः जालसहिततया सर्वान् शुकान् नीतवान् ।